## पञ्चदशः पाठः

# श्रेष्ठतमं कार्यम्

**कथामाध्यमेन नीति-धर्म-त्याग-सेवा-परोपकारादिभावानां शिक्षणं संस्कृतसाहित्ये प्राचीनकालादेव प्रवर्तते। वैदिककालादेव गद्यसाहित्यस्य कथाविधायाः प्रचारः प्रसारः लेखनञ्च अनवरतक्रमेणाधुनापि दृश्यते। अत्र सङ्कलितैषा बालमनोविनोदिनी कथा प्रस्तूयते।**

कुण्डलः कश्चन सदाचारी वृद्धः ब्राह्मणः। सः वेदशास्त्रज्ञः आसीत्।

कुण्डलस्य पुत्रः सुकर्मा महान् पितृभक्तः। सः पितुः सकाशादेव वेदशास्त्रयोः अध्ययनं करोति स्म। श्रद्धया मातुः पितुश्च सेवां करोति स्म।

सुकर्मा 'मातृदेवो भव' 'पितृदेवो भव' इति वचनम् अव्यवधानेन पालयति स्म। प्रतिदिनं नदीतः जलम् आनीय पित्रोः स्नानं कारयति। समये रुचिकरं पाकं कृत्वा परिवेषयति। ग्रीष्मकाले तौ व्यजनेन वीजयति। रात्रौ जागरितः सन् एव तयोः सेवां करोति। एवं च पित्रोः सेवायामेव तस्य सर्वः अपि समयः व्ययितः भवति स्म।

तस्मिन् काले एव पिप्पलः नाम कश्चन् तपस्वी निवसति स्म। सः आश्रमे तिष्ठन् घोरं तपः आचरति। तस्य तपः प्रभावेण प्राणिनः अपि जातिवैरं परित्यज्य सहैव आनन्देन निवसन्ति स्म।

पिप्पलः वर्षं यावत् जलम् अन्नं च अस्वीकृत्य वायुमात्रं सेवमानः तपः आचरितवान्। तपसः प्रभावेण तस्य शरीरे अपूर्वं तेजः प्राकाशत। सन्तुष्टाः देवाः तस्य उपरि पुष्पवृष्टिं कृतवन्तः। इन्द्रः प्रत्यक्षः भूत्वा "वरं याचतु" इति उक्तवान्।

पिप्पलः – "अशेषं विश्वं मम अधीनं भवतु" इति वरमयाचत्। इन्द्रः "तथास्तु" इति उक्तवान्। परन्तु वरप्राप्त्या पिप्पलः अहङ्कारी जातः। प्रपञ्चे मत्सदृशः तपस्वी अन्यः कोऽपि नास्ति। अहमेव सर्वश्रेष्ठः इति सः अमन्यत।

पितामहः ब्रह्मा "पिप्पलस्य गर्वः निवारणीय" इति निश्चित्य सारसरूपं धृत्वा पिप्पलस्य समीपम् अगच्छत् अवदच्च – "भवान् किमर्थम् आत्मानं श्रेष्ठं मन्यते ? एषः भवतः अहङ्कारः। महत् तपः कृत्वा अपि भवान् ज्ञानं न लब्धवान्। कुण्डलस्य पुत्रः सुकर्मा भवदपेक्षया ज्ञानी अस्ति। यद्यपि सः यज्ञयागादिकं न कृतवान्, त्वत् सदृशः कठोरं तपः अपि न आचरितवान्। तथापि तेन पित्रोः सेवया तादृशं ज्ञानं लब्धम्" इति।

एतदाकर्ण्य आश्चर्यचकितः पिप्पलः तदा एव सुकर्मणः समीपं गत्वा अपृच्छत् – "भवता कथम् एतादृशं ज्ञानम् अर्जितम्?" इति।

सुकर्मा विनयेन पिप्पलं नमस्कृत्य अवोचत्–ब्रह्मन्! अहं किमपि न जानामि। न मया यज्ञः कृतः, न वा तीर्थाटनं कृतम्, तपः अपि न आचरितम्, अहं तु पित्रोः सेवामेव कृतवान्। अहं चिन्तयामि यत् पित्रोः सेवायाः श्रेष्ठतमम् अन्यत् कार्यं नास्ति। तयोः सेवायाः परिणामतः एव मया एतादृशी सिद्धिः प्राप्ता।

सुकर्मणः वचनं श्रुतवतः पिप्पलस्य ज्ञाननेत्रे उद्घटिते। तस्य गर्वः अपि अपगतः। सः विनय–शीलः सञ्जातः।

## शब्दार्थः

| | | | | | |
|---|---|---|---|---|---|
| वेदशास्त्रज्ञः | – | वेदशास्त्र का ज्ञाता | जातिवैरम् | – | जातिगत शत्रुता भाव |
| सकाशात् | – | पास से | परित्यज्य | – | छोड़कर |
| पाकं कृत्वा | – | पकाकर | सहैव | – | साथ ही |
| परिवेषयति | – | परोसता है | सेवमानः | – | सेवन करते हुए |
| व्यजनेन वीजयति | – | पँखे से हवा करता है। | प्राकाशत | – | प्रकट किया |
| व्ययितः | – | व्यतीत होता था। | अशेषम् | – | सम्पूर्ण |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) सुकर्मणः पितुः नाम किम्?

(ख) कुण्डलस्य पुत्रस्य नाम किम् ?

(ग) कस्य प्रभावेण प्राणिनः जातिवैरं परित्यज्य आनन्देन निवसन्ति स्म ?

(घ) कः सारसरूपं धृत्वा पिप्पलस्य समीपं गतवान् ?

(ङ) वरं प्राप्य पिप्पलः कीदृशः जातः ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) कः महान् पितृभक्तः आसीत् ?

(ख) पिप्पलः कं वरं याचितवान् ?

(ग) सगर्वं पिप्पलं वीक्ष्य ब्रह्मा किं निश्चितवान् ?

(घ) केन प्रकारेण पिप्पलस्य गर्वः अपगतः ?

(ङ) कस्य उपरि देवाः पुष्पवृष्टिं कृतवन्तः ?

### (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) सुकर्मा कथं पित्रोः सेवां करोति स्म ?

(ख) पिप्पलस्य गर्वापनयनाय पितामहः किमुक्तवान् ?

(ग) श्रेष्ठतमं कार्यमिति पाठस्य आशयः कः ?

### (4) उचितशब्दैः रिक्तस्थानपूर्तिं कुरुत –

(अहमेव, तपः, पितृभक्तः, विनयशीलः, पिप्पलः)

(क) कुण्डलस्य पुत्रः सुकर्मा महान् . . . . . . . . . . . . . .।

(ख) वरप्राप्त्या . . . . . . . . . . . . . . अहङ्कारी जातः।

(ग) सः आश्रमे तिष्ठन् घोरं . . . . . . . . . . . . . . आचरति।

(घ) . . . . . . . . . . . . . . सर्वश्रेष्ठः इति सः चिन्तितवान्।

(ङ) सः . . . . . . . . . . . . . . सञ्जातः।

## (5) निम्नलिखितशब्दानां पर्यायशब्दान् लिखत –

(क) पुत्रः

(ख) इन्द्रः

(ग) निशा

(घ) माता

(ङ) पिता

## (6) अधोलिखितपदानां विभक्तिं वचनं च लिखत –

| | पदानि | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | कुण्डलस्य | | |
| (ख) | पितुः | | |
| (ग) | रात्रौ | | |
| (घ) | आनन्देन | | |
| (ङ) | समये | | |

## (7) अधोलिखितपदानि संस्कृतवाक्येषु प्रयुज्यन्ताम् –

(क) परित्यज्य

(ख) तपस्वी

(ग) पितृभक्तः

(घ) सर्वश्रेष्ठः

(ङ) कृतवान्

## (8) शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत–

(क) कुण्डलः वेदशास्त्रज्ञः आसीत्। ☐

(ख) पिप्पलः वरप्राप्त्या निरभिमानी जातः। ☐

(ग) इन्द्रः सारसरूपं धृत्वा पिप्पलस्य समीपं गतवान्। ☐

(घ) सेवायाः श्रेष्ठतमम् अन्यत् कार्यं नास्ति। ☐

(ङ) सुकर्मा आश्रमे तिष्ठन् घोरं तपः आचरति। ☐

**( 9 ) निम्नलिखितवाक्येषु रेखाङ्कितानि सर्वनामपदानि कस्य स्थाने प्रयुक्तानि ? पाठम् आधृत्य लिखत –**

(क) अहमेव सर्वश्रेष्ठः इति <u>सः</u> चिन्तितवान्।

(ख) पित्रोः सेवायामेव <u>तस्य</u> सर्वः अपि समयः व्ययितः भवति।

(ग) <u>तस्य</u> गर्वः अपि अपगतः।

(घ) <u>भवता</u> कथम् एतादृशं ज्ञानं सम्पादितम्।

(ङ) सन्तुष्टाः देवाः <u>तस्य</u> उपरि पुष्पवृष्टिं कृतवन्तः।

**( 10 ) अधोलिखितपदानां सन्धिं सन्धिविच्छेदं च कृत्वा सन्धेः नाम लिखत –**

| | शब्दः | सन्धिविच्छेदः | सन्धेः नाम |
|---|---|---|---|
| (क) | कश्चन | – – – – – – – – | – – – – – – – – |
| (ख) | – – – – – | सकाशात् + एव | – – – – – – – – |
| (ग) | – – – – – | सह + एवम् | – – – – – – – – |
| (घ) | यद्यपि | – – – – – – – – | – – – – – – – – |
| (ङ) | नास्ति | – – – – – – – – | – – – – – – – – |

**( 11 ) अधोलिखितानां शब्दानां समासविग्रहं कुरुत –**

| | शब्दः | समासविग्रहः | समासनाम |
|---|---|---|---|
| (क) | सुकर्मा | | |
| (ख) | प्रतिदिनम् | | |
| (ग) | पुष्पवृष्टिम् | | |
| (घ) | आश्चर्यचकितः | | |
| (ङ) | विनयशीलः | | |

**योग्यताविस्तारः –**

- पाठे आगतान् अव्ययशब्दान् चित्वा पञ्च वाक्यानि लिखत।
- हितोपदेशात् पञ्चतन्त्रात् च अन्याः कथा पठत।
- कथायाः सारः लेखनीयः।

❖ ❖ ❖